# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit (2nd Language) | Date of submission: NA |
|---|---|---|
| प्रश्न-उत्तर | Topic: उपायं चिन्तयेत् प्रज्ञास्तथापायं च चिन्तयेत् | Note: Pl. file in portfolio |

**१. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत –**

(क) नरस्य वृत्तं के जानन्ति?

उत्तर - नरस्य वृत्तं आदित्यचन्द्रौ, द्यौ भूमि आप: हृदयं यम: अह: रात्रि उभे सन्ध्ये धर्म: च जानन्ति ।

(ख) धर्मबुद्धयः वीक्षन्ते?

उत्तर - धर्मबुद्धयः मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् सर्वभूतेषु आत्मवत् वीक्षन्ते।

(ग) कस्य जन्मनः फलं व्यर्थम्?

उत्तर - **येन देशान्तरेषु बहुविधभाषावेषादि न ज्ञातम् धरणीपीठे भ्रमता तस्य जन्मन: फलं व्यर्थम् ॥**

(घ) पापबुद्धिः स्वपितरं किम् उक्तवान्?

उत्तर - पापबुद्धिः स्वपितरम् उक्तवान् तात ! मया धर्मबद्धेः प्रभूत: अर्थः चोरितः । भवान् यदि मदुक्तप्रकारेण वदति तर्हि तत् धनं मयि स्थिरं तिष्ठति, अन्यथा अस्माकं प्राणैः सह यास्यति ।

(ङ) प्राज्ञः किं-किं चिन्तयेत्?

उत्तर - प्राज्ञः उपायं चिन्तयेत् तथा अपायं च चिन्तयेत् ।

(च) मानवः कदा विद्यां वित्तं शिल्पं च प्राप्नोति?

उत्तर - मानवः यावत् भूमौ देशात् देशान्तरम् व्रजति तावत् स: विद्यां वित्तं शिल्पं च प्राप्नोति ।

(छ) पापबुद्धिः किं चिन्तयित्वा देशान्तरं प्रस्थितः?

उत्तर - पापबुद्धिना चिन्तितं यत् अहं तावान्मूर्खो दरिद्रतया पीडितश्च । अत एनं धर्म बुद्धिं स्वीकृत्य अन्यं देशं गच्छामि, तत्र अस्य आश्रयणेन धनं सम्पादयामि, अनन्तरम् एनमपि वञ्चयित्वा सुखी भवामि इति ।

**२. अधोलिखितवाक्येषु स्थूलाक्षरपदानि आश्रित्य प्रश्ननिर्माणं कुरुत –**

(क) **एनम्** अपि वञ्चयित्वा सुखी भवामि । कम्

(ख) सर्वं धनं स्वीकृत्य **स्वग्रामं** गच्छावः । कुत्र

(ग) **निशीथे** अटव्यां गत्वा तत् सर्वं वित्तम् आनीतवान् । कदा

(घ) तत् आकर्ण्य सर्वे ते जनाः **विस्मयोत्फुल्ललोचनाः** सञ्जाताः । कीदृशा:

(ङ) अहम् एतत् शमीकोटरं **वह्निना** प्रज्वालयामि । केन

**३. अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति लिखत –**

| | **कः** | **कं प्रति** |
|---|---|---|
| (क) वत्स! द्रुतं वदयेन तद्द्रव्यं स्थिरं तिष्ठेत् । | पिता | पापबुद्धिम् प्रति |

| | | |
|---|---|---|
| (ख) प्रातःकाले युवामस्माभिः सह तत्र वनप्रदेशं गच्छतम् । | | |
| | धर्माधिकारी | धर्मबुद्धिं पापबुधिं प्रति |
| (ग) त्वया हृतम् एतद्धनं, नान्ये न । | पापबुधिं | धर्मबुद्धिं प्रति |
| (घ) भोः दुरात्मन् ! मा मैवं वद । | धर्मबुद्धिं | पापबुधिं प्रति |
| (ङ) एतत् सर्व मपि पापबुद्धेः चेष्टि तम् । | पापबुद्धे: | जनान् / धर्माधिकारीं प्रति |

**४. उदाहरणानुसारं भूतकालि कवाक्यानि वर्त मानकालि कवाक्येषु परिवर्तयत –**

| **भूतकालिकवाक्यानि** | **वर्तमानकालिकवाक्यानि** |
|---|---|
| **उदाहरणम्** – भवानपि मया सहैव प्रभूतं धनं प्राप्तवान् । | भवानपि मया सहैव प्रभूतं धनं प्राप्नोति । |
| (क) राजपुरुषाः पापबुद्धिं दण्डितवन्तः। | राजपुरुषाः पापबुद्धिं दण्डयन्ति । |
| (ख) पापबुद्धिः अत्यधिकं धनं सम्पादितवान् । | पापबुद्धिः अत्यधिकं धनं सम्पादयति । |
| (ग) पापबुद्धिः वनदेवतायाः समीपम् आगतवान्। | पापबुद्धिः वनदेवतायाः समीपम् आगच्छति । |
| (घ) अत्रान्तरे पापबुद्धिः शिरस्ताडयन् उक्तवान् । | अत्रान्तरे पापबुद्धिः शिरस्ताडयन् वदति । |
| (ङ) सर्वे जनाः धर्मबुद्धिं प्रशंसितवन्तः । | सर्वे जनाः धर्मबुद्धिं प्रशंसन्ति । |

**५. श्लोकानां भावार्थान् विचिन्त्य कोष्ठकात् समुचित पदैः रिक्त स्थानानि पूरयत –**

(क) सूर्यः चन्द्रः **पवनः** अग्निः आकाशः भूमिः जलं **हृदयं** यमः दिवसः रात्रिः प्रभातं सायं च मनुष्याणां सर्वविधं **व्यवहारं** जानन्ति । अतः वयं सर्वदा उत्तमं व्यवहारं कुर्मः ।

(ख) यः **अन्यदेशेषु** न अटति, विविधदेशानां संस्कृतीः **भाषाः** च न जानाति, पृथिवीपृष्ठे तस्य जन्म **व्यर्थं** भाति ।

(ग) सज्जनाः सर्वा सु नारीषु **मातरः** इव, अन्येषां **द्रव्येषु** मृत्पिण्डम् इव, सर्वेषु प्राणिषु च **स्वयम्** इव चिन्तयन्ति ।

(घ) बुद्धिमान् मनुष्यः **कार्यसाधनस्य** मार्गा न् समस्या दूरीकरणस्य **कौशलानि** च **जानीयात्** ।

**६. उदाहरणं दृष्ट्वा अधोलिखितानां पदानां विग्रहं मेलनं वा कुरुत –**

| | |
|---|---|
| **उदाहरणम् –** अर्थोपार्जनम् | अर्थस्य उपार्जनम् |
| (क) गुरुजनाज्ञया | गुरुजनानां आज्ञा |
| (ख) वनदेवता | वनस्य देवता |
| (ग) वित्ताभावात् | वित्तस्य अभावात् |
| (घ) बुद्धिप्रभावेण | बुद्धेः प्रभावात् |
| (ङ) धरणिपीठे | धरण्याः पीठे |
| (च) राजकुले | राज्ञः कुले |

**७. अधोलिखितानि वाक्यानि कथाक्रमानुसारं पुनः लिखत –**

(क) कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म ।

(ख) ततस्तौ गुरुजनानाम् अनुमतिं प्राप्य शुभेऽहनि देशान्तरं प्रस्थितौ ।

(ग) यथा द्वाभ्यां चिन्तितं तथैव भूमिं खनित्वा तत्रैव धनं निक्षिप्य स्वगृहं गतवन्तौ ।

(घ) द्वावपि गत्वा तत् स्थानं यावत् खनतः तावद् रिक्तं भाण्डं दृष्टवन्तौ ।

(ङ) भवान् यदि मदुक्तप्रकारेण वदति तर्हि तद्धनं मयि स्थिरं तिष्ठति ।

(च) राजपुरुषाः पापबुद्धिं दण्डितवन्तः ।